24. सत्यनारायणपुजा

पत्रा · 13 · पू०

1329

10" × 4·50"

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

अथ कुबेर[illegible]जनमंत्र धनदाय[illegible]
[illegible]धिपाय[illegible] भगवते [illegible]
न्यादिसंयद्ः १ अथ लक्ष्मी[illegible]जनमंत्र श्री[illegible]
ह्नम् महालक्ष्मि विसीद्[illegible]सर्वधनसं[illegible]
र्जार्थमेहिहि[illegible]भवीभाग्यंदेहि ले २
त[illegible]ध्यानम सरस्वत्याबाहनम् सर्वलोभा
[illegible]देवि सर्वकल्याणदायिनि [illegible]
हिदेवेशि सर्व संपत्प्रदायिनि ३

देवेशादुमवेस्वाहाधिभ्य[illegible] स्वधा
च[illegible]स्वाहादेविह[illegible]
[illegible]स्वधेत्यभिधाने[illegible]
[illegible]: १

महाभारतकी पर्व अठारह १८ तिनके नाम ॥
आदिपर्व १ सभापर्व २ वनपर्व ३ विराट
पर्व ४ उद्योगपर्व ५ भीष्मपर्व ६ कर्णपर्व
७ द्रोणपर्व ७ शल्यपर्व ८ सौप्तिकप
र्व १० स्त्रीपर्व ११ शांतिपर्व १२ अनुशा
सिक १३ अश्वमेधिक १४ आश्रमवा
स १५ मोसलपर्व १६ महाप्रस्थानि
क १७ स्वर्गपर्व १८ इमे अष्टादश प०

॥ श्री [illegible] ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

एतोस्मिव्रतेनदीक्षामाप्नोतिदीक्षयाआप्नोतिदक्षिणांदक्षिणाश्रद्धा...मोतिश्रद्धयासत्यमाप्यते १
तत्राचार्य्यवरणम्। नमोस्त्वनंतायेति पादप्रक्षालनम्। युंजंतिब्रध्नमरुषमिति गंधादिकम्। अद्येहेत्यादि० अमुकगोत्र अमुकशर्मा
सपत्नीकः श्रीसत्यनारायणप्रीतिद्वारा प्रागीप्सितकर्मसिद्ध्यर्थं विस्तरयनादिपूर्वकं श्रीसत्यनारायणपूजनकथाश्रवणा
र्थं विष्णुगोत्रं विष्णुशर्माणं ब्राह्मणं मे भिर्गंधाक्षतपुष्पफलद्रव्यादिभिस्त्वामहं० वृतोऽस्मीति प्रतिवचनं २

म०पू० श्रीगणेशाय नमः अथ सत्यनारायणपूजनकथाप्रकारमाह तत्रादौ यजमानः सपत्नीकः सं पूजनार्थं
१ भृतोपस्करमानीय गोमयेन पूजास्थानमालिप्य तत्र निधाय स्नानं कुर्यात् आचार्य्यं वृणुयात्
आचार्योऽपि पूजनार्थं विधिं प्रकल्प्यादौ स्वस्त्ययनादि मंगलं कृत्वा यजमानं चतुष्कोपर्य्यासने निवे
श्य तत्र व्रती सपत्नीकयजमानः संक्रान्तौ पूर्णिमायां चैकादश्यां वा यस्मिन्कस्मिन्दिने सायंकाले
उपविश्याचम्य पवित्रधारणं कृत्वा गणेशगौरीवरुणदेवतामण्डलस्थापितगणपत्या
दिपंचलोकपालदेवतासूर्यादीनवग्रहदेवतानां प्रतिष्ठावाहने कृत्वा संकल्पं कुर्यात् अद्ये
हेत्यादि अमुकगोत्र अमुकनामधेयशर्माहं श्रीसत्यनारायणप्रीतिद्वारा सकलदुरितोपशमन
सर्वोपशान्तिपूर्वकसकलाभीष्टसिद्ध्यर्थं यथासम्पादितसामग्र्या गणेशगौरीवरुणदेव
तागणपत्यादिपंचलोकपालदेवतासूर्यादिनवग्रहदेवतापूजनपूर्वकं श्रीसत्यनारा
यणपूजनकथाश्रवणमहं करिष्ये तत्रादौ गणेशादिकं पूजयेत् तत्प्रकारमाह विनायकन्न रामः
मस्कृत्य सर्वविघ्नविनाशनम् लंबोदरं त्रिनेत्रं च गणेशमावाहयाम्यहम् इति मंत्रेण संस्थाप्य १

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

इति ध्यात्वावाहयेत् २

ध्यानं कुर्यात् लंबोदरं सकलसुंदरमेकदंतं रक्तांबरं त्रिनयनं परमं पवित्रम् उद्यद्दिवाकरकरोज्वलका
यकांतं विघ्नेश्वरं सकलविघ्नहरं नमामि १ सर्वतीर्थमये वारि सर्वदेवसमन्विते अस्मिन्घटे समागच्छ
तिष्ठ देवगणैः सह १ हे हेरंब त्वमेह्येहि अंबिकात्र्यंबकात्मज सिद्धिबुद्धिपते त्र्यक्ष लक्षलाभपतेः पि
ता २ इत्यावाह्य भूरसि भूमिरसीति मंत्रेण भूमिं स्पृशेत् ९ ध्येन मङ्गलिगं धाद्युपचारैः पूजयेत्
मानस्तोकेति नमस्कारः आजिघ्र कलशमित्यादिना प्रतिष्ठां कृत्वा संकल्पं कुर्यात् तत्र संकल्पः
अद्येहेत्यादि० अमुकगोत्रो मुकशर्मा सपत्नीकः अमीप्सितकर्मणां निर्विघ्नपरिसमाप्त्यर्थं करिष्य
माणश्री सत्यनारायणपूजनकर्मणो निर्विघ्नतासिध्यर्थं च यथासंपादितोपस्करेण गणे
शादीनां सूर्यादिमंडलस्थदेवानां च पूजनमहं करिष्ये तत्र गणानां त्वेति मंत्रेण श्रीमन्महा
गणपतये नमः इत्यनेन वारेण च नाक्षतपुष्पगंधाद्युपचारैर्गणपतिं पूजयेत् अथ गौरीं ध्या
त्वा पूजयेत् महाकालि महादेवि सर्वरोगापहारिणि पूजार्थं मे हि कल्याणि सर्वोपद्रवनाशिनि १
आगच्छ वरदे देवि दैत्यदर्पनिषूदनि पूजां गृहाण सुमुखे नमस्ते शंकरप्रिये २ ॐ भूर्भुवः स्वः गौरी

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

ब्रह्मजज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोवेनआवः।।सबुध्न्या[illegible] अस्यविष्ठाःसतश्चयोनिमसतश्चविवः २ ६
विष्णोरराटमसिविष्णोःश्नप्त्रेस्थोविष्णोःस्यूरसिविष्णोर्ध्रुवो[illegible]मवमसिविष्णवेत्वा १ ६

सं०पू० २ ह्यागच्छेहतिष्ठेत्यावाह्य जयंतीतिश्रीखंडेतिवागंधाक्षताद्युपचारैःपूजयेत् ततःप्रार्थना सर्वसौभाग्य
देदेविसर्वकल्याणदायिनि पूजार्थंमेहिदेवेशिसर्वसंपत्प्रदायिनि १ देविदेविमहादेविदेहिमेवांछि
तंफलम् देहिसौभाग्यमारोग्यंगौर्यैदेविनमोस्तुते २ इतिसंप्रार्थ्य ततःवरुणपूजाकलशम
ध्ये इमंमेवरुणश्रुधीहवमद्याचमृडय त्वामवस्युराचके इतिवरुणायनमइतिवागंधाक्षताद्यु
पचारैःपूजयेत् ततोगणेशादिपंचलोकपालपूजनपूर्वकंस्वस्वमंडलस्थानाभिवाहनादि
कंपूजयेत् गणानांत्वेतिगणपतिम् ब्रह्मजज्ञानमितिब्रह्माणम् विष्णोरराटेतिविष्णुम् न
मःशंभवायेतिमहेशम् श्रीश्चतेतिलक्ष्मीम् ॐआकृष्णेनरजसावर्तमानोनिवेशयन्नमृतंम
र्त्यंच हिरण्ययेनसवितारथेनदेवोयातिभुवनानिपश्यन्नितिसूर्यम् इमंदेवाअसपत्नंसु
वध्वंमहतेक्षत्रायमहतेज्यैष्ठ्यायमहतेजानराज्यायेंद्रस्येंद्रियाय इमममुष्यपुत्रममुष्यै
पुत्रमस्यैविशएषवोमीराजासोमोस्माकंब्राह्मणानांराजाइतिचंद्रम् २ अग्निर्मूर्धादिवः रा
ककुत्पतिःपृथिव्याअयम् अपांरेतांसिजिन्वतिइतिभौमम् ३ उद्बुध्यस्वाग्नेप्रतिजागृ २

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

हित्वमिष्टाहर्तैसधंसृजेथामयंच अस्मिंत्सधस्थेअध्युत्तरस्मिन्विश्वेदेवायजमानश्चसीदतइतिबुधं ४
बृहस्पते अतियदर्यो अर्हाद्युमद्विभातिक्रतुमज्जनेषु यद्दीदयच्छवसऋतप्रजाततदस्मासुद्रविणंधेहि
चित्रम् इतिगुरुम् ५ अन्नात्परिस्रुतोरसंब्रह्मणाव्यपिबत्क्षत्रंपयः सोमंप्रजापतिः ऋतेनसत्यमि
न्द्रियंविपानंशुक्रमन्धसइन्द्रस्येन्द्रियमिदंपयोऽमृतंमधु इतिशुक्रम् ६ शन्नोदेवीरभिष्टयआ
पोभवन्तुपीतये शंयोरभिस्रवन्तुनः इतिशनिम् ७ कयानश्चित्रआभुवदूतीसदावृधः सखा
कयासचिष्ठयावृता इतिराहुम् ८ केतुंकृण्वन्नकेतवेपेशोमर्या अपेशसे समुषद्भिरजायथ
इतिकेतुम् ९ ईश्वराद्यधिदेवेभ्योनमः अग्न्यादिप्रत्यधिदेवेभ्योनमः इन्द्रादिदशदिग्पालेभ्योन
मः मंडलस्थापितदेवेभ्योनमः इतिमंडलस्थदेवानांपूजनम् ततोऽनन्तपूजा नमोस्तुसर्पेभ्यो
येकेचपृथिवीमनु येअन्तरिक्षेयेदिवितेभ्यः सर्पेभ्योनमोनमोऽह्मनंतंपूजयेत् सूर्यायनमः गंधा
क्षतपुष्पंबिल्वपत्रंसमर्पयामि इतिसर्वेषांचतुर्थ्यैनेनाममंत्रेणपूजयेत् धूरसिधूर्वधूर्वन्तंधू
र्वतंयोस्मान्धूर्वतितंधूर्वयंवयंधूर्वामः देवानामसिवह्नितमंसस्नितमंपप्रितमंजुष्टतमंदेवहूतम
म् इतिधूपम् अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहासूर्योज्योतिर्ज्योतिःसूर्यः स्वाहा अग्निर्वर्चोज्योतिर्वर्चः

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

स०पू० स्वाहा सूर्यो वर्च्चो ज्योतिर्वर्च्चः स्वाहा ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा इति दीपम् स्वादिष्ठया मदिष्ठया प
३ वस्व सोम धारया इन्द्राय पातवे सुतः इति नैवेद्यम् लवङ्गकर्पूरयुतमिति ताम्बूलम् इदं फलं मया देवेनि
पूगफलम् पूजाफलप्रतिष्ठार्थं तवाग्रे द्रव्यमीश्वर यथार्पितेन मे प्रीतः पूर्णान्कुरु मनोरथान्
इति पूर्णादर्वीति वा निदक्षिणां समर्पयामि कृतेनानेनार्चनेनैभिरेचनाक्षतपुष्पबिल्वपत्रवस्त्र
धूपदीपनैवेद्यताम्बूलपूगफलद्रव्यादिभिर्यथाकृतमर्चनादियद्दत्तं तेन श्रीगणेशगौरीवरुणाः
मंडलस्थापितपंचलोकपालसूर्यादिदेवाः सुप्रीता वरदाः संतु आयुःकर्त्तारः क्षेमकर्त्तारः
शुभकर्त्तारः कल्याणकर्त्तारो भवंतु इति गणेशादिपूजा अथ सत्यनारायणपूजनप्रकार
माह पुष्पं गृहीत्वा ध्यानं कुर्यात् ध्यायेत्सत्यं गुणातीतं गुणत्रयसमन्वितम् लोकनाथं त्रिलो
केशं कौस्तुभाभरणं हरिम् १ नीलवर्णं पीतवासं श्रीवत्सपदभूषितम् गोविंदं गोकुलानंदं ब्र
ह्माद्यैरपि पूजितम् २ इति ध्यानम् व्यक्ताव्यक्तस्वरूपाय हृषीकपतये नमः मयानिवेदितं भक्त्या
अर्घोयं प्रतिगृह्यताम् इत्यर्घम् नारायण नमस्तेस्तु नरकार्णवतारक पाद्यं गृहाण देवेश
मम सौख्यं विवर्द्धय ४ इति पाद्यम् मंदाकिन्यास्तु यद्वारि सर्वपापहरं शुभम् तदिदं कल्पितं दे रामः
३

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

दुग्धांतरस्मृतं मांसं पयसा संयुतं दधि। पयोनुकृतमारव्यतां भ्रपात्रेन दुष्यति ३

आज्यमकपलं स्नाप्यपयोदेयं पलद्वयम्॥ गोमयं द्विगुणं देयं दधि गोमयजो रसः १ गोमूत्रं नीलवर्ण्या याः कृष्णाया गोमयः स्मृतः॥ रोहिता ×
याः पयश्चैव महापातकनाशनम् २ अभावे सर्ववर्णायाः कपिलायाः विशेषतः॥ पयसस्तु पलं २ घात् दध्नस्त्रिपलमेव च ३ आज्यमेकपलं

वृषस्य गाचम्यतात्वया ५ इत्याचमनीयम् स्नानं पंचामृतं देव गृहाण पुरुषोत्तम अनाथनाथ सर्व- २ धातासम ×
ज्ञ गीर्वाणप्रणतप्रिय ६ तन्मंत्रमाह पयः पृथिव्यांपय ऽओषधीषु पयो दिव्यन्तरिक्षे पयोधाः प- नः शौचमि
यस्वतीः प्रदिशः संतु मह्यम् इति दुग्धेन दधिक्राव्णो ऽअकारिषं जिष्णोरश्वस्य वाजिनः सुरभि- च्छता ६
नो मुखाकरत्प्रण ऽआयूंषि तारिषत् २ इति दध्ना घृतं घृतपावानः पिबत वसां वसापावा- पंचगव्यं
नः पिबतान्तरिक्षस्य हविरसि स्वाहा दिशः प्रदिश आदिशो विदिश उद्दिशो दिग्भ्यः स्वाहा
३ इति घृतेन अपां रसमुद्वयसं सूर्ये सन्तं समाहितम् अपां रसस्य यो रसस्त-
वो गृह्णाम्युत्तममुपयामगृहीतो सीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतम-
शर्करया ४ म ४ इति मधुना मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः माध्वीर्नः सन्त्वोषधीः मधु नक्त-
मुतोषसो मधुमत्पार्थिवं रजः मधु द्यौरस्तु नः पिता मधुमान्नो वनस्पतिर्मधुमां ऽअस्तु सू-
र्यः माध्वीर्गावो भवन्तु नः ५ इति क्षौद्रेण पंच नद्यः सरस्वतीमपियन्ति सस्रोतसः सरस्वती
तु पंचधा सो देशे भवत्सरित् इति सर्वमेकीकृत्य स्नापयेत् ततः शुद्धस्नानं प्रसमस्तकेन

मधुमाध्व्या २

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

आगच्छ भगवं ... श्रीदि... दास्यामि केशव। तुभ्यं दास्यामि तुलसीं त्वं कामप्रदो भव १ अन्यच्च पार्वतीबीजसंभूतां वं रामभ
क्तिसंस्थिताम्। अनादिमध्यनिधनां वल्लभां ते ददाम्यहम् २॥ ॥

गगय ५

स०पू० इतिस्नानम् वेदसूक्तसमायुक्ते यज्ञसामसमन्विते सर्ववर्णप्रदे देववाससी ते समन्विते ७
४ इतिवस्त्रम् ब्रह्माविष्णुमहेशानैर्निर्मितं ब्रह्मसूत्रकम् यज्ञोपवीतदानेन प्रीयतां कमलाप
तिः ८ इतियज्ञोपवीतम् श्रीखण्डं चंदनं दिव्यं गंधाढ्यं सुमनोहरम् विलेपनं सुरश्रेष्ठ चंदनं
प्रतिगृह्यताम् इतिचंदनम् ९ ॐ श्रीसत्यनारायणाय नमः इतितुलसीदलम् मल्लिकादिसुगंधी
नि मालत्यादीनि वै प्रभो मयाहृतानि पूजार्थं पुष्पाणि प्रतिगृह्यताम् इतिपुष्पम् १० वनस्प
तिरसोद्भूतो गंधाढ्यः सुमनोहरः आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ११ इतिधूपम्
आज्यं च वर्तिसंयुक्तं वह्निना योजितं मया दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम् १२ इति
दीपम् घृतपक्वं हविष्यान्नं पायसं च सशर्करम् नानाविधं च नैवेद्यं विष्णो मे प्रतिगृह्यताम्
इतिनैवेद्यम् १३ सर्वपापहरं दिव्यं गांगेयं निर्मलं जलम् आचमनं मया दत्तं गृह्यतां पुरुषोत्त
म १४ इत्याचमनम् लवंगकर्पूरयुतं तांबूलं सुरपूजितम् प्रीत्या गृहाण देवेश मम सौख्य
विवर्द्धय १५ इतितांबूलम् इदं फलं मया देव स्थापितं पुरतस्तव तेन मे सफलावाप्तिर्भवेज्जन्म रामः
नि जन्मनि १६ इतिपूगादिफलम् चतुर्वर्तिसमायुक्तं गोघृतेन च पूरितम् नीराजनेन सन्तु ४

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

अंदेचतुष्पादतलेच दद्याद्दनाभिदेशमुखमण्डलेका॥स प्राङ्मुखंरं शुचिसर्वदेशेसा रात्रिकाम संज्ञेष्वदेश
एकंचसारवौसमत्नीणिदद्याद्विनायके। चत्वारिकेशवेदद्यात्छिवेचार्द्ध प्रदक्षिणाम १॥ २

२४

लोमवल्लेवजगत्पतिः १७ इतिनीराजनम् यानियानिचदुःखानिसर्वपापकृतानिच नानिनानिविन
श्यन्तिप्रदक्षिणाकृतेमयि १८ इतिप्रदक्षिणा ततःपुष्पांजलिकृत्वास्तुवीत यन्मयाभक्तियोगेनप
त्रंपुष्पंफलंजलम् आवेदितंचनैवेद्यंतद्गृहाणानुकम्पया १९ मंत्रहीनंक्रियाहीनंभक्तिहीनंज
नार्द्दन यत्पूजितंमयादेवपरिपूर्णंतदस्तुमे २० अमोघंपुण्डरीकाक्षंनृसिंहंदैत्यसूदनम् हृषीके
शंजगन्नाथंवागीशंवरदायकम् २१ गुणात्रयंगुणातीतंगोविन्दंगरुडध्वजम् जनार्द्दनंजना
तीतंजानकीवल्लभंहरिम् २२ प्रणमामिसदाभक्त्यानारायणमतःपरम् दुर्गमेविषमेघोरेशत्रु
भिःपरिपीडिते २३ निस्तारयन्तुसर्वेषुतथानिष्ठचयभूये नामान्येतानिसंकीर्त्त्येप्सितफल
माप्नुयात् २४ सत्यनारायणंदेवंवंदेहकामदंप्रभुम् लीलयावततंविश्वंयेनतस्मैनमोनमः २५
इतिप्रार्थनम इतिपूजनप्रकारविधिः अथकथा ऋषयऊचुः व्रतेनतपसाकिंवाप्राप्यतेवांछि
तफलम तत्सर्वंश्रोतुमिच्छामःकथयस्वमहामुने १ सूतउवाच नारदेनैवमुक्तःसभगवान्
कमलापतिः सुरर्षयेयथैवाहतच्छृणुध्वंसमाहिताः २ एकदानारदोयोगीनरानुग्रहकांक्षया

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

सं॰ क॰ पर्यटन्विविधाँल्लोकान्मर्त्यलोकमुपागमत् ३ ततो दृष्ट्वा जनान्सर्वान्नानाक्लेशसमन्वितान् नानायो
५ निसमुत्पन्नान्क्लिश्यमानान्स्वकर्मभिः ४ केनोपायेन चैतेषां दुःखनाशो भवेद्ध्रुवम् इति संचिंत्य म
नसा विष्णुलोकं गतस्तदा ५ तत्र नारायणं देवं शुक्लवर्णं चतुर्भुजम् शंखचक्रगदापद्मवनमाला
विभूषितम् ६ दृष्ट्वा तं देवदेवेशं स्तोतुं समुपचक्रमे नारद उवाच नमस्ते वाङ्मनातीतरूपायान
तशक्तये ७ आदिमध्यान्तहीनाय निर्गुणाय महात्मने सर्वेषामादिभूताय भक्तानामार्तिना
शिने ८ श्रुत्वा स्तोत्रं ततो विष्णुर्नारदं प्रत्यभाषत श्रीभगवानुवाच किमर्थमागतोसि त्वं किं ते
मनसि वर्त्तते ९ कथयस्व महाभाग तत्सर्वं कथयामि ते नारद उवाच मर्त्यलोके जनास्सर्वे
नानाक्लेशसमन्विताः १० नानायोनिसमुत्पन्नाः पच्यंते पापकर्मभिः तत्कथं शमयेन्ना
यलघूपायेन तद्वद ११ श्रोतुमिच्छामि तत्सर्वं कृपास्ति यदि ते मयि श्रीभगवानुवाच साधु
पृष्टं त्वया वत्स लोकानुग्रहकांक्षया १२ यत्कृत्वा मुच्यते मोहात्तच्छृणुष्व वदामि ते व्रतमस्ति राम॰
महापुण्यं स्वर्गे भुवि च दुर्ल्लभम् १३ तव स्नेहान्मया विप्र प्रकाशः क्रियतेऽधुना सत्यनाराय ५

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

गुरुवेदवाक्ययोर्विश्वासः श्रद्धा। यद्वा सत्कर्मनेषु साधारणानुकंपा श्रद्धा। वा सद्विषयनिरतिशयभावनाबुद्धिः श्रद्धा
तथा च देवलः। सा मुख्यायाः तिसं प्रीतिरर्थिनां दर्शने दया। सत्कृतिः श्वानस्य याचसा श्रद्धा परिकीर्तिता १ ।। ४
यद्वा सत्कर्मनिष्ठा श्रद्धा ४

एषैकं व्रतं सम्यग्विधानतः २४ कृत्वा सद्यः सुखं भुक्त्वा परत्रे मोक्षमाप्नुयात् तच्छ्रुत्वा भगवद्वा
क्यं नारदो मुनिरब्रवीत् २५ किं फलं किं विधानं च कृतं केनैव तद्व्रतम् तत्सर्वं विस्तरेण ब्रूहि करु
कार्य्यहितद्व्रतम् २६ श्रीभगवानुवाच दुःखशोकादिशमनं धनधान्यप्रवर्द्धनम् सौभा
ग्यसंततिकरं सर्वत्र विजयप्रदम् २७ यस्मिन्कस्मिन्दिने मर्त्यो भक्तिश्रद्धासमन्वितः तोरणा
दिप्रकर्त्तव्यकदलीस्तंभमण्डितम् २८ पंचभिः कलशैर्युक्तं ध्वजा[illegible]दिसमन्वितम् जलपू र्णे
र्णैः सरत्नैश्च पूगीफलसमन्वितैः २९ भूषितैः पुष्पमालाभिस्सन्नधान्योपरिस्थितैः अच्छा
दयेत्पृथुवस्त्रैर्नानावर्णविचित्रितैः ।।२०।। चंदनादिसुगंधेन लेपयेद्गृहमण्डपम् शंखभे
रीमृदंगेन वादयेद्बहुभिर्जनैः २१ नानामंगलचारस्तु कर्त्तव्यो मम सद्मनि संध्यायां
नियमं कृत्वा दंतधावनपूर्वकम् २२ प्रातरुत्थाय मेधावी स्नात्वाऽऽवश्यकमाचरेत्
तदनु प्रतिमामेकां सुवर्णस्य शुभाकृतिम् २३ कारयेद्वित्तमानेन स्नापयेच्च यथावि
धि पंचामृतैस्ततो वस्त्रयुगेन परिवेष्टयेत् २४ ताम्रपात्रेऽथ विन्यस्य स्थापयेत्प्राति

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

स०क० ६ मांशुभाम् प्रतिष्ठां च प्रकुर्वीत स्वस्तिवाचनपूर्वकम् २५ चंदनेन सुगंधेन पुष्पैः का
लोद्भवैः फलैः धूपैर्दीपैः सनैवेद्यैस्तांबूलैस्सफलैः शुभैः २६ सत्यनारायणं देवं यजे
द्देवं निशामुखे ब्राह्मणैर्बांधवैश्चैव सहितो धर्मतत्परः २७ नैवेद्यं भक्तितो दद्यात्स
पादं भक्ष्यमुत्तमम् रंभाफलं घृतं क्षीरं गोधूमस्य च चूर्णकम् २८ अभावे शालिचूर्णं
वा शर्करा च गुडं तथा सपादं सर्वभक्ष्याणि चैकीकृत्य निवेदयेत् २९ विप्राय दक्षिणां
दद्यात्कथां श्रुत्वा जनैः सह ततश्च बंधुभिः सार्द्धं विप्रादिभ्यः प्रदापयेत् ३० सपादं भ
क्षयेद्भक्त्या नृत्यगीतादिकं चरेत् जनः स्वस्वगृहं गच्छेत्सत्यनारायणं स्मरन् ३१
एवं कृते मनुष्याणां वांछासिद्धिर्भवेद्ध्रुवम् विशेषतः कलियुगे लघूपायोस्ति भूतले
३२ इति श्रीस्कंदपुराणे रेवाखंडोक्तसत्यनारायणकथायां प्रथमोध्यायः १ सूत उ
वाच अथान्यत्संप्रवक्ष्यामि कृतं येन पुरा द्विज कश्चित्काशीपुरे रम्ये ह्यासीद्विप्रोऽतिनिर्ध राम:
नः २ क्षुत्तृड्भ्यां व्याकुलो भूत्वा नित्यं बभ्राम भूतले दुःखितं ब्राह्मणं दृष्ट्वा भगवान् ६

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

ब्राह्मणप्रियः २ दृष्ट्वा च ब्राह्मणो भूत्वा पप्रच्छ द्विजमादरात् किमर्थं भ्रमसे विप्र महीं नित्यं सुदुः
खितः ३ तत्सर्वं श्रोतुमिच्छामि कथ्यतां द्विजसत्तम विप्र उवाच ब्राह्मणोस्मि दरिद्रोहं भिक्षा
र्थं भ्रमामि द्विज ४ उपायं यदि जानासि कृपया कथय प्रभो वृद्धब्राह्मण उवाच सत्यना
रायणो विष्णुर्वाञ्छितार्थफलप्रदः ५ तस्य त्वं पूजनं विप्र कुरुष्व व्रतमुत्तमम् यत्कृत्वा
सर्वदुःखेभ्यो मुक्तो भवति मानवः ६ तद्व्रतस्य विधानं च विप्रायाभाष्य यत्नतः सत्य
नारायणो वृद्धस्तत्रैवान्तरधीयत ७ तद्व्रतं संकरिष्यामि यदुक्तं ब्राह्मणेन वै इति
संचिन्त्य विप्रोसौ रात्रौ निद्रां न लब्धवान् ८ ततः प्रातः समुत्थाय सत्यनारायणव्रतम्
करिष्य इति संकल्प्य भिक्षार्थमगमद्द्विजः ९ तस्मिन्नेव दिने विप्रः प्रचुरं द्रव्यमाप्तवान्
तेनैव बंधुभिः सार्द्धं सत्यस्य व्रतमाचरत् १० सर्वदुःखविनिर्मुक्तः सर्वसंपत्समन्वि
तः बभूव स द्विजश्रेष्ठो व्रतस्यास्य प्रभावतः ११ ततः प्रभृति कालं च मासि मासि व्र
तं कृतम् एवं नारायणस्येदं व्रतं कृत्वा द्विजोत्तमः १२ सर्वपापविनिर्मुक्तो दुर्लभं मो

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

स०क० क्षेमाप्नुयात् व्रतं तस्य यदा विप्र पृथिव्यां संकरिष्यति २३ तदैव सर्वदुःखं च मनुजस्य विनश्य
७ ति एवं नारायणेनोक्तं नारदाय महात्मने २४ मया तत्कथितं विप्राः किमन्यत्कथयामि
वः ऋषय ऊचुः तस्माद्विप्राद्व्रतं केन पृथिव्यां चरितं मुने २५ तत्सर्वं श्रोतुमिच्छामः श्र
द्धास्माकं प्रजायते सूत उवाच शृणुध्वं मुनयः सर्वे व्रतं येन कृतं भुवि २६ एकदा स द्वि
जवरो यथाविभवविस्तरैः बंधुभिः स्वजनैः सार्द्धं व्रतं कर्तुं समुद्यतः २७ एतस्मिन्नंत
रे काले काष्ठक्रेता समागमत् बहिः काष्ठं च संस्थाप्य विप्रस्य गृहमाययौ २८ तृष्ण
या परिपीडात्मा विप्रं दृष्ट्वा कृतव्रतम् प्रणिपत्य द्विजं प्राह किमिदं क्रियते त्वया २९
कृते किं फलमाप्नोति विस्तराद्वद मे प्रभो विप्र उवाच सत्यनारायणस्येदं व्रतं सर्वे
प्सितप्रदम् ३० तस्य प्रसादान्मे सर्वं धनधान्यादिकं महत् तस्मात्तद्व्रतं ज्ञात्वा का स
ष्ठक्रेतातिहर्षितः ३१ पपौ जलं प्रसादं च भुक्त्वा तं नगरं ययौ सत्यनारायणं देवं म एमः
नसा इत्यचिंतयत् ३२ काष्ठं विक्रयतो ग्रामे प्राप्यते चाद्य यद्धनम् तेनैव सत्यदेव ७

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

स्यकरिष्येव्रतमुत्तमम् २३ इतिसंचिंत्यमनसाकाष्ठंकृत्वातुमस्तके जगामनगरंरम्यंधनिनांय
त्रसंस्थितिः २४ तद्दिनेकाष्ठमूल्यंचद्विगुणंप्राप्तवानसौ ततःप्रसन्नहृदयःसुपक्वंकदली
फलम् २५ शर्करांचघृतंदुग्धंचगोधूमस्यचचूर्णकम् कृत्वैकत्रसपादंचगृहीत्वास्वगृ
हंययौ २६ ततोवंधून्समाहूयचकारविधिनाव्रतम् तद्व्रतस्यप्रभावेनधनपुत्रान्वि
तोभवत् २७ इहलोकेसुखंभुक्त्वाचांतेसत्यपुरंययौ इतिश्रीस्कंदपुराणेरेवाखंडे
श्रीसत्यनारायणकथायांद्वितीयोऽध्यायः २ सूतउवाच पुनरग्रेप्रवक्ष्यामिशृणु
ध्वंमुनिसत्तमाः पुराचोल्कामुखोनामनृपश्चासीन्महामतिः १ जितेंद्रियःसत्यवा
दीययौदेवालयंप्रति दिनेदिनेधनंदत्वाद्विजान्समतोषयत् २ भार्यातस्यप्रमुग्धाच
सरोजवदनासती भद्रशीलानदीतीरेसत्यस्यव्रतमाकरोत् ३ एतस्मिन्नंतरेतत्रसा
धुरेकःसमागतः वाणिज्यार्थंबहुधनैरनेकैःपरिपूरितः ४ नावंसंस्थाप्यतत्तीरे
जगामनृपतिंप्रति दृष्ट्वासव्रतिनंभूपंपप्रच्छविनयान्वितः ५ साधुरुवाच किमि

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

सतं व्रत जनेराजा ।गदसांगं व्रतं शुभम् कथां श्रुत्वा नमस्कृत्य परं संप्रार्थ्य गोष्ठितम् १
ततः प्रभृति कालं च मनसा संस्मरन्व्रतम् ४

स०क० दत्तुरुवेराजन्भक्तियुक्तेन चेतसा प्रकाशं कुरु तत्सर्वं श्रोतुमिच्छामि सांप्रतम् ६ राजो
८ वाच पूजनं क्रियते साधो विष्णोरतुलतेजसः व्रतं च स्वजनैः सार्द्धं पुत्राद्यावाप्तिकाम्य
या ७ भूपस्य वचनं श्रुत्वा साधुः प्रोवाच सादरम् सर्वं कथय मे राजन्करिष्येहं तवोदि
तम् ८ ममापि संततिर्नास्ति एतस्माज्जायते ध्रुवम् ततो निवृत्त्य वाणिज्यं सानंदो गृ
हमागतः ९ भार्य्यायै कथितं सर्वं व्रतं संततिदायकम् तदा व्रतं करिष्यामि यदा मे सं
ततिर्भवेत् १० इति लीलावतीं प्राह स्वपत्नीं साधुसत्तमः एकस्मिन्दिवसे तस्य भा
र्या लीलावती सती ११ भर्तृयुक्तानंदयुक्ताभवद्धर्मपरायणा गर्भिणी साभव
त्तस्य भार्या सत्यप्रसादतः १२ दशमासि गते तस्याः कन्यारत्नमजायत दिने दिने
सा ववृधे शुक्लपक्षे यथा शशी १३ नाम्ना कलावती चेति तन्नामकरणं कृतम्
ततो लीलावती प्राह स्वामिनं मधुरं वचः २४ न करोषि किमर्थं वा पुरा संकल्पितं व्रत एम॰
म् साधुरुवाच विवाहसमये ह्यस्याः करिष्यामि व्रतं प्रिये २५ इति भार्यां समाश्वा ८

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

स्वजगामनगरंप्रति. ततः कलावतीकन्याववृधेपितृवेश्मनि १६ दृष्ट्वाकन्यांततः साधुर्नग
रे सखिभिः सह मंत्रयित्वाद्रुतंदूतंप्रेषयामासधर्म्मवित् १७ विवाहार्थंचकन्यायावरं
श्रेष्ठंविचारयत् तेनाज्ञप्तश्चदूतोसौकांचनंनगरंययौ १८ तस्मादेकंवणिक्पुत्रंसमादाय
गतोहिसः दृष्ट्वातुसुंदरंबालंवणिक्पुत्रंगुणान्वितम् १९ ज्ञातिभिर्बंधुभिः सार्द्धंपरितुष्टेनचे
तसा दत्तवान्साधुपुत्रायकन्यांविधिविधानतः २० ततोऽभाग्यवशात्तेनविस्मृतंव्रतमुत्तमम्
विवाहसमयेप्यस्यास्तेनरुष्टोभवत्प्रभुः २१ ततः कालेननियतोनिजकर्म्मविशारदः वाणि
ज्यार्थंगतः शीघ्रंजामात्रासहितोवणिक् २२ रत्नसारपुरेरम्येगत्वासिंधुसमीपतः वाणि
ज्यमकरोत्साधुर्जामात्राश्रीमतासह २३ तौगतौनगरेरम्येचंद्रकेतोर्नृपस्यच एतस्मिन्ने
वकालेतुसत्यनारायणः प्रभुः २४ भ्रष्टप्रतिज्ञामालोक्यशापंतस्मैप्रदत्तवान् दारुणं
कठिनंचास्यमहद्दुःखंभविष्यति २५ एतस्मिन्दिवसेराज्ञोधनमादायतस्करः तत्रैवचागत
श्चौरोवणिजौयत्रसंस्थितौ २६ तत्पश्चाद्धावकान्दूतान्दृष्ट्वाभीतेनचेतसा धनंसंस्थाप्य
तत्रैवसतुशीघ्रमलक्षितः २७ ततोदूताः समायातायत्रास्तेसज्जनोवणिक् दृष्ट्वानृपध

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

सं०क० तंतत्रबध्वाहूतावणिक्सुतौ २८ हर्षेणधावमानश्चउचुर्नृपसमीपतः तस्करौद्वौसमानीतौवि
९ लोक्याज्ञापयप्रभो २९ राज्ञाज्ञप्तास्ततःशीघ्रंदृढंबध्वातुतावुभौ स्थापितौद्वौमहादुर्गकारागा
रेविचारतः ३० मायायाःसत्यदेवस्यनश्रुतंकैस्तयोर्वचः अतस्तयोर्धनंराज्ञागृहीतंचन्द्रकेतु
ना ३१ तच्छापाच्चतयोर्गेहेभार्याचैवातिदुःखिता चौरेणापिहृतंसर्वंगृहेयच्चस्थितंधनम्
३२ आधिव्याधिसमायुक्ताक्षुत्पिपासातिपीडिता अन्नचिन्तापराभूत्वाबभ्रामचगृहेगृहे ३३
कलावतीतुकन्यापिबभ्रामप्रतिवासरम् एकस्मिन्दिवसेयाताक्षुधार्त्ताद्विजमंदिरम् ३४
गत्वापश्यद्व्रतंतत्रसत्यनारायणस्यच उपविश्यकथांश्रुत्वावरंप्रार्थितवान्किल ३५ प्रसाद
भक्षणंकृत्वाययौरात्रौगृहंप्रति माताकलावतींकन्यांकथयामासप्रेमतः ३६ पुत्रिरात्रौ
स्थिताकुत्रकिंतेमनसिवर्त्तते कन्याकलावतीप्राहमातरंप्रतिसत्वरम् ३७ द्विजालयेव्रतंमा
तर्दृष्टंवांछितसिद्धिदम् तच्छ्रुत्वाकन्यकावाक्यंव्रतंकर्त्तुंसमुद्यता ३८ सामुदातुवणिग्भार्या
सत्यनारायणस्यच व्रतंचक्रेचवैसाध्वीबंधुभिःस्वजनैःसह ३९ भर्त्तृजामातरौक्षिप्रमाग रामः
च्छतांस्वमाश्रमम् इतिदिव्यंवरंवव्रेसत्यदेवंपुनःपुनः ४० अपराधंचभर्त्तुर्मेजामातुःक्षं ९

तुमर्हसि व्रतेनतुष्टोसौसत्यनारायणःप्रभुः पुनः ४१ दर्शयामासस्वप्नेहिचंद्रकेतुंनृपोत्तमम् वंदि
नौमोचयप्रातःवणिजौनृपसत्तम ४२ देयंधनंचतत्सर्वंगृहीतंयत्त्वयाधुना नोचेत्वांनाश
यिष्यामिसराज्यधनपुत्रकम् ४३ एवमाभाष्यराजानंध्यानगम्योभवत्प्रभुः ततःप्रभात
समयेराजाचस्वजनैःसह ४४ उपविश्यसभामध्येप्राहपात्रजनंप्रति बद्धौमहाजनौशीघ्रं
मोचयद्वौवणिक्सुतौ ४५ इतिराज्ञोवचःश्रुत्वामोचयित्वामहाजनौ समानीयनृपस्याग्रेप्रो
क्तस्तेविनयान्विताः ४६ आनीतौद्वौवणिक्पुत्रौमुक्तौनिगडबंधनात् ततोमहाजनौन
त्वाचंद्रकेतुंनृपोत्तमम् ४७ स्मरंतौपूर्ववृत्तांतौनोचतुर्भयविह्वलौ राजावणिक्सुतौवी
क्ष्यवचःप्रोवाचसादरम् ४८ देवात्प्राप्तंमहद्दुःखमिदानींनास्तिवाभयम् नदाक्षत्वानुसत्या
गस्तुरकर्म्माधिकारयेत् ४९ वस्त्रालंकारकंदत्वापरितोष्यनृपश्चतौ पुरस्कृत्यवणिक्पुत्रौ
वचसातोषयद्भृशम् ५० पुरानीतंतुयद्द्रव्यंद्विगुणीकृत्यदत्तवान् प्रोवाचतौततोराजागच्छ
साधोनिजाश्रमम् ५१ राजानंप्रणिपत्याहगंतव्यंत्वत्प्रसादतः यात्रांतुकृतवान्साधुर्मंग
लायनपूर्विकाम् ५२ ब्राह्मणायधनंदत्वातदातुनगरंययौ कियद्दूरंगतेसाधौसत्यनार

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

कियद्दूरेन्नतोगत्वास्थितः सिंधुसमीपतः ३

सं०कां० यण्एः प्रभुः ५३ जिज्ञासांकृतवान्साधोकिमस्तितवनोस्थितम् ततोमहाज्ञनोन्मत्तोहेलयाच
२० प्रहस्यच ५४ कथंप्रच्छसिभोदंडिन्मुग्धान्तंकिमिच्छसि लतापत्रादिकंचेववर्तनेनरणोम
म ५५ निष्ठुरंचवचः श्रुत्वासन्तुभवत्तुनवचः एवमुक्त्वागतः शिघ्रंदंडीतस्यसमीपतः ५६
गतेदंडिनिसाधुश्चकृतनित्यक्रियस्तदा ५७ उत्थित्वातरणिंदृष्ट्वाविस्मयंपरमंययौ दृ
ष्ट्वालतादिकंचैवमूर्छितोऽन्यपतद्भुवि ५८ लब्धसंज्ञोवणिक्पुत्रस्ततश्चिंतान्वितोभवत्
तदातंदुहितुःकांतः वचनंचेदमब्रवीत् ५९ किमर्थंक्रियतेशोकः शापोदत्तश्चदंडिना
शक्यतेतेनसर्वंहिकर्तुंचात्रनसंशयः ६० अतस्तच्छरणंयामोवांछितार्थोभविष्य
ति जामातुर्वचनंश्रुत्वातच्छकाशंगतस्तदा ६१ दृष्ट्वाचदंडिनंभक्त्यानत्वाप्रोवाचसाद
रम् क्षमस्वचापराधंमेयदुक्तंतवसन्निधौ ६२ एवंपुनः पुनर्नत्वामहाशोकाकुलोभव
त् प्रोवाचवचनंदंडीविलपंतंविलोक्यच ६३ मारोदीः शृणुमद्वाक्यंममपूजावहिर्मुखः
ममाज्ञयाचदुर्बुद्धेलब्धंदुःखंमुहुर्मुहुः ६४ तच्छ्रुत्वाभगवद्वाक्यंस्तुतिंकर्तुंसमुद्यतः साधुरुवाच त्वन्मायामोहिताः सर्वेब्रह्माद्यास्त्रिदिवौकसः ६५ नजानंतिगुणारूपंतवा १०

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

आर्य्यमिदं प्रभो मूढोऽहं त्वां कथं जाने मोहितस्तव मायया ६६ प्रसीद पूजयिष्यामि यथाविभवविस्त
रैः पुरावित्तं च सहितं त्राहि मां शरणागतम् ६७ श्रुत्वा भक्तियुतो वाक्यं परितुष्टो जनार्दनः वरं
च वांछितं दत्वा तत्रैवान्तरधीयत ६८ ततो नावं समारुह्य दृष्ट्वा वित्तप्रपूरितम् कृपया सत्यदेवस्य सफ
लं वांछितं मम ६९ इत्युक्त्वा स्वजनैः सार्द्धं पूजां कृत्वा यथाविधि हर्षेण चाभवत्पूर्णः सत्यदे
वप्रसादतः ७० नावं संयोज्य यत्नेन स्वदेशगमनं कृतम् साधुर्जामातरं प्राह पश्य रत्नपुरीं
मम ७१ दूतं च प्रेषयामास निजवित्तस्य रक्षकम् दूतोसौ नगरं गत्वा साधुभार्य्यां विलो
क्य च ७२ प्रोवाच वांछितं वाक्यं नत्वा बध्वांजलिस्तदा निकटे नगरस्यैव जामात्रा सहितो
वणिक ७३ आगतो बंधुवर्गैश्च वित्तैश्च बहुभिर्युतः श्रुत्वा दूतमुखाद्वाक्यं महाहर्षवती स
ती ७४ सत्यपूजां ततः कृत्वा प्रोवाच तनुजां प्रति व्रजामि शीघ्रमागच्छ साधुसंदर्शनाय च
७५ इति मातृवचः श्रुत्वा व्रतं कृत्वा समाप्य च प्रसादं च परित्यज्य गता सापि पतिं प्रति ७६
तेन रुष्टः सत्यदेवो भर्त्तारं तरणिं तथा संहृत्य च धनैः सार्द्धं जले नावममज्जयत् ७७ ततः
कलावती कन्या नो विलोक्य निजपतिम् शोकेन महता तत्र रुदती चापतद्भुवि ७८ दृष्ट्वा
तथापि विधवा कन्या च बहुदुःखिताम् भीतेन मनसा साधुः किमाश्चर्य्यमिदं भवेत् ७९

प३

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

स०क० चिंत्यमानाश्च ते सर्व्वे बभूवुस्तत्रिवाहका: ततो लीलावती कन्यां दृष्ट्वा तु विकलाभवत् ८०
११ विललापातिदु:खेन भर्त्तारं चेदमब्रवीत् इदानीं नौकया सार्द्धं कथं सोभूदलक्षित: ८१
न जाने कस्य देवस्य हेलया चैव सा हृता सत्यदेवस्य माहात्म्यं ज्ञातुं वा केन शक्यते ८२ इ
त्युक्त्वा विललापैव ततश्च स्वजनै: सह ततो लीलावती कन्या क्रोडे कृत्वा रुरोद च ८३
ततः कलावती कन्या नष्टे स्वामिनि दु:खिता गृहीत्वा पादुकां तस्यानुगन्तुं मनो दधौ
८४ कन्यायाश्चरितं दृष्ट्वा सभार्य्य: सज्जनो वणिक अतिशोकेन संतप्तश्चिंतयामास
धर्म्मवित् ८५ हृतं वा सत्यदेवेन भ्रान्तोहं सत्यमायया सत्यपूजां करिष्यामि यथावि
भवविस्तरै: ८६ इति सर्व्वान्समाहूय कथितं च मनोरथम् नत्वा च दंडवद्भूमौ सत्य
देवं पुन: पुन: ८७ ततस्तुष्ट: सत्यदेवो दीनानां परिपालक: जगाद वचनं चैनं कृपया
भक्तवत्सल: ८८ त्यक्त्वा प्रसादं ते कन्या पतिं द्रष्टुं समागता अतोऽदृष्टोभवत्तस्या: क
न्याया: पतिर्ध्रुवम् ८९ गृहं गत्वा प्रसादं च भुक्त्वा चायाति चेत्पुन: लब्धभर्त्ता सुता साधो एम:
भविष्यति न संशय: ९० कन्यका तादृशं वाक्यं श्रुत्वा गगनमंडलात् क्षिप्रं तदा गृहं गत्वा ११

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

प्रसादंच्चबुभोजसा ४१ सापश्चात्तुनरागत्यददर्शस्वजनंपतिम् ततःकलावतीतुष्टाजगा
दपितरंप्रति ४२ इदानींचगृहंयाहिविलंबंकुरुषेकथम् तच्छ्रुत्वाकन्यकावाक्यंसंतुष्टो
भूद्वणिक्सुतः ४३ धनैर्बंधुगणैःसार्द्धंजगामनिजमंदिरम् पूर्णमास्यांचसंक्रांतौकृ
तवान्सत्यपूजनम् ४४ इहलोकेसुखंभुक्त्वाचांतेसत्यपुरंययौ इतिश्रीस्कंदपुराणेरेवा
खंडेसत्यनारायणकथायांतृतीयोऽध्यायः ३ सूतउवाच अथान्यच्चप्रवक्ष्यामिशृणु
ध्वंमुनिसत्तमाः आसीत्तुंगध्वजोराजाप्रजापालनतत्परः १ प्रसादंसत्यदेवस्यत्यक्त्वा
दुःखमवापसः एकदासवनंगत्वाहत्वाबहुविधान्पशून् २ आगत्यवटमूलेचदृष्ट्वासत्य
स्यपूजनम् गोपाःकुर्वंतिसंतुष्टाभक्तियुक्ताःसबांधवाः ३ राजादृष्ट्वातुदर्पेणनगतोननना
मसः ततोगोपगणाःसर्वेप्रसादंनृपसन्निधिम् ४ संस्थाप्यपुनरागत्यभुक्त्वासर्वेयथेप्सितम्
ततःप्रसादंसंत्यक्त्वाराजादुःखमवापसः ५ तस्यपुत्रशतंनष्टंधनधान्यादिकंचयत् सत्यदे
वेनतत्सर्वंनाशितंममनिश्चितम् ६ अतस्तत्रैवगच्छामियत्रदेवस्यपूजनम् इतिमनसा
विनिश्चित्यययौगोपालसन्निधिम् ७ ततोऽसौसत्यदेवस्यपूजांगोपगणैःसह भक्तिश्रद्धा

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

सं०क० न्वितोभूत्वाचकारविधिनानृपः ८ सत्यदेवप्रसादेनधनपुत्रान्वितोभवत् इहलोकेसुखंभुक्त्वाप
१२ श्चात्सत्यपुरंययौ ९ यइदंकुरुतेसत्यव्रतंपरमदुर्लभम् शृणोतिचकथांपुण्यांभक्तियुक्तः
फलप्रदाम् १० धनधान्यादिकंतस्यभवेत्सत्यप्रसादतः दरिद्रोलभतेवित्तंबद्धोमुच्येतबंध
नात् ११ भीतोभयात्प्रमुच्येतसत्यमेतन्नसंशयः ईप्सितंचफलंभुक्त्वाचांतेसत्यपुरंययौ प्रजेत ४
१२ इतिवःकथितंविप्राःसत्यनारायणव्रतम् यत्कृत्वासर्वदुःखेभ्योमुक्तोभवतिमानवः
१३ विशेषतःकलियुगेसत्यपूजाफलप्रदा केचित्कालंवदिष्यन्तिसत्यमीशंतमेवहि मे६
१४ सत्यनारायणंकेचित्सत्यदेवंतथापरे नानारूपधरोभूत्वासर्वेषामीप्सितप्रदः १५
भविष्यतिकलौसत्यव्रतरूपीसनातनः यइदंपठतेनित्यंशृणोतिमुनिसत्तमाः १६ तस्य
नश्यन्तिपापानिसत्यदेवप्रसादतः इतिश्रीस्कन्दपुराणेरेवाखण्डेसत्यनारायणक
थायांचतुर्थोऽध्यायःसमाप्तिमगमत् ४ ततोगोदानमाचार्यायदद्यात् तत्रसंकल्पः ॐ
अद्येहेत्यादि० अमुकगोत्रअमुकशर्मासपत्नीकःकृतस्यसत्यनारायणव्रतपूजनकर्मणःसा एमः
द्गतास्यसंपूर्णताहेतवेरजतमुद्रोपकल्पितांगांरुद्रदैवतांविष्णुगोत्रायविष्णुशर्मणेऽऽचा १२
ततोऽऽचार्यःकलशोदकेनसपरिवारंयजमानमभिषिंचेत् देवस्यत्वासवितुरितिमंत्रेण।।युंजंतीतिमंत्रेणतिल
कम्।।ब्राह्मणायदक्षिणांदद्याद्भोजयित्वाद्विजोत्तमान्।।सर्वेषांमानुषाणांचबालस्त्रीवृद्धनागताः।।नैवे
द्यदीयतांतेषांनकश्चिद्यातिरिक्तये।।३।। तस्मात्सर्वप्रयत्नेनकुर्यात्सत्यस्यपूजनम् १७ ४

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

छंदांऽशसिगच्छस्वाहा द्यावापृथिवींगच्छस्वाहा॥ यज्ञंगच्छस्वाहा सोमंगच्छस्वाहा ६

स०पू० २३ पयितुभ्यमहं संप्रददे तत्सांगतासिद्ध्यर्थं यथापरिमितं द्रव्यं तुभ्यमहं सं० अथाशीर्वादः मंत्रार्थाः
सफलाः संतु पूर्णाः संतु मनोरथाः शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तथा १ यावदग्निश्च
वायुश्च यावच्चंद्रार्कतुद्दिशः तावत्त्वं विजयी भूत्वा कुरु राज्यं सनातनम् २ ततः सर्वेभ्यो नैवेद्य
दद्यात् विसर्जनम् ॐ गच्छगच्छ परस्थानं स्वस्थानं परमेश्वर यत्र ब्रह्मादयः सर्वे न विदुः परमं
पदम् १ इति विष्णुम् ततो मंडलस्थापितदेवानां विसर्जनम् समुद्रंगच्छस्वाहा अंतरिक्षं
गच्छस्वाहा देवं सवितारंगच्छस्वाहा मित्रावरुणौगच्छस्वाहा अहोरात्रेगच्छस्वाहा दिव्यं न
भोगच्छस्वाहा अग्निंगच्छस्वाहा वैश्वानरंगच्छस्वाहा मनो मे हार्दियच्छ दिवं ते धूमो गच्छतु स्व
र्ज्योतिः पृथिवीं भस्मनापृण स्वाहा २ गणेशाद्यादि सूर्यादि देवाः स्वस्थानं गच्छंतु ततः प्रा
र्थना ग्रहाः राज्यं प्रयच्छंतु ग्रहाः राज्यं हरंति च ग्रहैस्तु व्यापितं सर्वं त्रैलोक्यं सचराचरम् १
आयुर्विद्यां बलं दद्युः यशः सौम्यं च पुष्कलम् पुत्रान्दत्त धनं दत्त सर्वान्कामांश्च देहि मे २
मंत्रहीनं क्रियाहीनं भक्तिहीनं च खेचराः प्रत्यहं पूजनं देव परिपूर्णं तदस्तु मे ३ यांतु देवग स०मः
णाः सर्वे पूजामादाय मामकीम् इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च ४ इति स०पू० २३

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

इति सत्य नारायण पूजा

CC-0 Uma Raman Jha Collection. Digitized by eGangotri